ष्टोमानुपीतिपाः देवीविशोऽन्धवर्त्मा च स्कन्धः सप्तम आप्नुवादिति" पुरा० ।

**अन्धातमस** न० कर्म्म० अन्धेभ्योऽपीति दीर्घः । निविड़ान्धकारे । रजन्यान्तु स्त्री ।

**अन्धिका** स्त्री अन्धयति अन्ध–प्रेरणे णिच् ण्वुल् । द्यूतक्रीड़ायाम् तया हि जनः अन्धइव विवेकशून्यः क्रियते । सर्षप्याञ्च तस्याश्चात्यन्तसेवनात् दृष्टिक्षयः वैद्यकप्रसिद्धः ।

**अन्धु** पु० अन्ध–कु । कूपे । कूपतुल्यच्छिद्रवत्त्वात् पुंचिह्ने च । "वाक्पाणिपादपाय्वन्धुसंज्ञान्याहुर्मनीषिणः" इति शा० ति० । अन्धुलिङ्गमिति शब्दा०चि० ।

**अन्धुल** पु० अन्ध–उलच् । शिरीषवृक्षे । तत्पुष्पदर्शनात् वियोगिनामन्धत्वात्तथात्वम् ।

**अन्ध्र** पु० अन्ध–रन् । देशभेदे स च देशः । "जगन्नाथादूर्द्ध्वभागादर्वाक् श्रीभ्रमरात्मकात् तावदन्ध्राभिधोदेश इत्युक्तः" ॥ वैदेहेन कारावरस्य स्त्रियामुत्पादिते अन्त्यजभेदे च । व्याधभेदे इति काश्यपः ।

**अन्न** न० अनित्यनेन अन–नन्, अद्यते इति अद–क्त वा "अन्नाण इति" पा० निर्द्देशात् अन्नार्थतया न जग्धिः । ओदने, खिन्नान्ने, 'शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते । आमं तु वितुषं ज्ञेयं खिन्नमन्नमुदाहृतम्" इति वसि० स्मृ० । अन्नमूलं हि जीवनमित्युक्तेः तेषां प्राणहेतुत्वात्तथात्वम् । तत्रामान्नेऽपि अन्नशब्दप्रयोगः 'आमान्नं हरये दत्त्वा पक्वं कृत्वाथ खादयेत् । षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिरिति" पुराणे 'चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् सिद्धं भुक्त्वा पराक" इति विष्णुस्मृते, आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा" इति मानवे च तत्र प्रयोगात् 'खिन्नमन्नमुदाहृतमिति वशिष्ठोक्तिस्तु परिभाषार्था न तु तन्मात्रस्यैवान्नताबोधनार्था । अतएव "अन्नमाश्रित्य पापानि तिष्ठन्ति हरिवासरे" इत्यादिनिषेधे आमान्नभक्षणस्यापि ग्रहणम् अन्नानि च विविधानि "अन्नानि विविधानीह भवन्ति गिरिसम्भवे" । इत्युपक्रम्य अष्टादशविधानि धान्यान्यभिधाय 'अन्नवर्ज्जव्रते देवि ! एतान्येव विवर्ज्जये"दित्यनेन पद्मपुराणे अन्नवर्ज्जनव्रते तेषां वर्ज्जनीयत्वाभिधानात् अष्टादश धान्यानि च धान्यशब्दे वक्ष्यन्ते "अन्नमशितं त्रेधा विधीयते तस्य यःस्थविष्ठोधातुस्तत्पुरीषं यन्मध्यमस्तन्मांसं योऽणिष्ठस्तन्मन" इति श्रुत्या 'अन्नमयं हि सोम्य मन इति" श्रुत्यन्तरोक्तं मनसोऽन्नमयत्वं यत् समर्थितं तत् सर्व्वप्रकारान्नविकारत्वेनैव । ततश्च "राजान्नं तेज आदत्ते" इत्यादौ निषिद्धतापि सर्वेषामेव । 'शूद्रेषु दासगोपालकुलमितार्द्धसीरिणः । भोज्यान्नाः नापितश्चैव यश्चात्मानं निवेदये"दित्यादावपि दासादेर्भोज्यान्नताप्रतिप्रसवः अष्टादशान्नविषयएव दासादयश्च संकीर्णजातिभेदाः पराशरोक्ता वेदितव्यास्ते च तत्तच्छब्दे दर्शयिष्यन्ते । "गोरसं तिलसक्तूंश्च तिलपिण्याकमेव च । अपूपान् भक्षयेत् शूद्राद्यच्चान्यत् पयसाकृतमिति" संवर्त्तवचनन्तु आपदि शूद्रान्ननिवृत्तानामपि भक्ष्यतार्थम् । "कन्दुपक्वं तैलपक्वं पायसं दधि सक्तवः । एतान्यशूद्रान्नभुजां भोज्यानि मनुरब्रवीदिति" हारीतवचने अशूद्रान्नभुजामिति विशेषणात्तथावगतेः एवमेव प्रा०वि० । 'अन्नं हि भूतानां श्रेष्ठं तस्मात् सर्व्वौषधमुच्यते" इति श्रुतौ अन्नस्य सर्व्वौषधिरूपत्वोक्तेः सर्वेषां व्रीह्याद्योषधीनामन्नत्वं व्यक्तमुक्तं "पृथिव्या ओषधय ओषधिभ्योऽन्नमिति" श्रुतौ च ओषधिजमात्रस्य अन्नत्वमुक्तम् 'अद्यतेऽदन्ति च भूतानि तस्मादन्नमित्युच्यते" इति तन्निरुक्तिरपि श्रुतौ दर्शिता । पृथिव्यां, तस्याश्च अन्नहेतुत्वादन्नशब्दवाच्यता । 'अद्भ्योऽन्नमिति श्रुतेः" "यत् कृष्णं रूपं तदन्नस्येति" छा०उप० श्रुतेश्च । अत एव भाष्यकृता 'हन्ताहमिमास्तिस्रो देवता" इति श्रुतौ इदमा तेजोबन्नात्मिकाया देवतायाः परामर्शः इत्युक्तम् । उदके च निरुक्त० तस्य च "वृष्टेरन्नं ततः प्रजा इति" मनुना अन्नहेतुत्वोक्तेस्तथात्वम् । तथाऽनिति प्राणित्यनेनेति व्युत्पत्तेः उदकस्य प्राणहेतुत्वादन्नत्वम् "आपोमयः प्राण" इत्युक्त्वा तत्समर्थनाय "आपः पीतास्त्रेधा विधीयन्ते तासां यःस्थविष्ठोधातुस्तन्मूत्रं योमध्यमः तल्लोहितं योऽणिष्ठः स प्राण इति छान्दोग्येऽपां प्राणहेतुत्वमुक्तम् । तथा "षोड़शकलो वा असौ पुरुषः" इत्युपक्रम्य "पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो न पिबितो विच्छेत्स्यते" इति तत्रैव जलपानाभावे प्राणविच्छेद उक्तः । प्राणानन्दहेतुत्वाद्वा अन्नस्य तथात्वम् यथा "आपो वा अन्नाद्भूयस्यस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणाः अन्नं कणीयो भविष्यतीति अथ यदा सुवृष्टिर्भवति आनन्दिनः प्राणाः भवन्ति अन्नं बहु भविष्यतीति छा०उप० । सूर्य्ये पु०सि०कौ० तस्य अन्नहेतुवृष्टिहेतुत्वात्तथात्वम् "आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा" इति मनुना तद्धेतुत्वोक्तेस्तथात्वम् भोगसाधने उपकरणे, न० "स्त्रियोऽन्नं पशवोऽन्नञ्च विप्रोऽन्नञ्च महोच्छितामिति" मनुः । भक्ष्यद्रव्ये च "प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत् । स्थावरं